# Shri Gananatha Stuti Ramakrita

# રામકૃતા શ્રીગણનાથસ્તુતિઃ

## Document Information

Text title : Shri Gananatha Stuti Ramakrita

File name : gaNanAthastutiHrAmakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 37 | 3.37. 40-62||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# રામકૃતા શ્રીગણનાથસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

રામ ઉવાચ ।

નમસ્તે ગણનાથાય ભક્તાનન્દવિવર્ધન ।

ભક્તિપ્રિયાય દેવાય હેરમ્બાય નમો નમઃ ॥ ૪૦॥

વેદાન્તવેદ્યરૂપાય મનોવાણીમયાય ચ ।

મનોવાણીવિહીનાય યોગાકારાય તે નમઃ ॥ ૪૧॥

ગજવક્ત્રાય વૈ તુભ્યં નિર્ગુણાત્મપ્રધારિણે ।

સગુણાય ચ કણ્ઠાધો નરાકારાય તે નમઃ ॥ ૪૨॥

અનાદયે ચ પૂજ્યાય સર્વેષાં સર્વદાયિને ।

આદિપૂજ્યાય વિઘ્નેશ નાનાવિઘ્નપ્રચાલક ॥ ૪૩॥

વિઘ્નહન્ત્રે સુભક્તાનાં વિઘ્નકર્ત્રે દુરાત્મનામ્ ।

સદા સ્વાનન્દનાથાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૪૪॥

વક્રતુણ્ડાય તે નાથ નમો લમ્બોદરાય વૈ ।

સતતં શાન્તિરૂપાય શાન્તિદાય નમો નમઃ ॥ ૪૫॥

મહોદરાય સિદ્ધેશ્ચ બુદ્ધેશ્ચ પતયે નમઃ ।

નાનૈશ્વર્યપ્રદાત્રે તે ભ્રમદાય નમો નમઃ ॥ ૪૬॥

નાનાજ્ઞાનપ્રભેદૈશ્ચ મોહકર્ત્રે નમો નમઃ ।

સુભક્તાનાં સદા નાથ ભ્રમમોહાદિહારિણે ॥ ૪૭॥

નાનાદૈત્યનિહન્ત્રે ચ દેવાનાં મદહારિણે ।

સુરાસુરમયાયૈવ બ્રહ્મેશાય નમો નમઃ ॥ ૪૮॥

સર્વત્ર યોગરૂપેણ સંયોગાયોગહીનતઃ ।

સંસ્થિતં તં કથં સ્તૌમિ ત્વાં વિઘ્નેશ વદ પ્રભો ॥ ૪૯॥

યં સમર્થા ગણાધ્યક્ષ યોગિનઃ શેષકાદયઃ ।

શિવાદયશ્ચ વેદા વૈ સ્તૌતું ન પ્રભવન્તિ તે ॥ ૫૦॥

તં કિં સ્તૌમિ ગણાધીશમતસ્ત્વાં પ્રણતોऽભવમ્ ।

તેન તુષ્ટશ્ચ માં નાથ પાલયસ્વ ત્વદાશ્રિતમ્ ॥ ૫૧॥
એવં સંસ્તુવતસ્તસ્ય ભક્તિભાવેન માનદ ।
ભક્ત્યા રોમોદ્ગમઃ પ્રાપ્તઃ કણ્ઠરોધો બભૂવ હ ॥ ૫૨॥
નનર્ત પરમાનન્દયુક્તોઽસૌ ભાર્ગવાગ્રણીઃ ।
જય વિઘ્નેશ હેરમ્બ ગણેશેતિ વદંસ્તદા ॥ ૫૩॥
તં તથા ભક્તિસમ્મગ્નં વીક્ષ્ય દેવો ગજાનનઃ ।
ઉવાચ સાશ્રુનેત્રશ્ચ સરોમાઞ્ચઃ પ્રજાપતે ॥ ૫૪॥
(ફલશ્રુતિઃ)
રામ રામ મહાભાગ શ ૃણુ મે પરમં વચઃ ।
ધન્યોઽસિ સર્વભાવેન ભક્તો મે મગ્નતાં ગતઃ ॥ ૫૫॥
ત્વયા કૃતમિદં સ્તોત્રં ભવેત્ ભક્તિરસપ્રદમ્ ।
પઠિષ્યતિ ચ યશ્ચૈતચ્છૃણુયાત્ સતતં પરમ્ ॥ ૫૬॥
તસ્યાઽહં સકલાં બાધાં નાશયિષ્યામિ નિત્યદા ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દગો ભવેત્ ॥ ૫૭॥
યદ્યચ્ચિન્તયતિ પ્રાજ્ઞ તત્તદ્દાસ્યામિ કેશવ ।
મમ માન્યઃ સદા સોઽપિ ભવિતા નાત્ર સંશયઃ ॥ ૫૮॥
પરશું મે ગૃહાણ ત્વં તેન મત્તૌલ્યગો ભવેઃ ।
જેષ્યસિ ત્વં મહાવીરમર્જુનં રાજભિર્વૃતમ્ ॥ ૫૯॥
નિઃક્ષત્રિયાં તથા પૃથ્વીં કરિષ્યસિ ન સંશયઃ ।
એકવિંશતિવારં ત્વં સદા જયસમન્વિતઃ ॥ ૬૦॥
નામ તે સર્વવિખ્યાતં ભવિષ્યતિ શુભપ્રદમ્ ।
ઉક્તં પરશુરામેતિ સ્મરણેન સુખપ્રદમ્ ॥ ૬૧॥
યજ્ઞાન્ કૃત્વા મહાભાગ યશઃ સંસ્થાપ્ય ભૂતલે ।
શાન્તિયોગસ્થભાવેન માં ભજિષ્યસિ નિત્યદા ॥ ૬૨॥

ઇતિ રામકૃતા શ્રીગણનાથસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૩૭ । ૩.૩૭। ૪૦-૬૨॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 37 . 3.37. 40-62..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Gananatha Stuti Ramakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*